# संस्कृत

## प्रथम प्रश्न पत्र (नाटकं, प्राचीनकाव्यं, संस्कृतसाहित्यस्य इतिहास)

**Time allowed : Three hours** **Maximum Marks : 100**

1. निम्नलिखितस्य श्लोकस्य सदर्भसहित अनुवाद करणीयः–

(क) या सृष्टिः स्रष्टुराद्या, वहति विधिहुतं हविर्या च होत्री,
ये द्वे कालं विद्यतः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति, यया प्राणिन प्राणवन्त,
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्तामिरष्टामिरीशः।।

अथवा

(ख) असंशयं क्षत्रपरिग्रहक्षमा,
यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु,
प्रमाणमन्तःकरण प्रवृत्त्यः।।

अथवा

क्व वयं का परोक्षमन्मथो
मृगशायैः सममेधितो जनः।
परिहासविजल्पितं राखे
परमार्थेन न गृह्यतां वचः।।

2. अधोलिखितस्य श्लोकस्य ससन्दर्भा व्याख्या करणीया–

(क) तव कुसुमशरत्वं शीतरश्मित्वमिन्दो
द्वयमिदमयथार्थ दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै–
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि।

अथवा

यास्यत्यद्य शकुन्तलेति हृदय संस्पृष्टमुलाकण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ता जडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकराः,

(ख) औत्सुक्यमात्रमवसाययति प्रतिष्ठा,
विलश्नाति लब्धपरिपालनदृत्तिरेनम्।
नातिश्रमापनयनाथ यथा श्रमाय,
राज्यं स्वहस्तघृतदण्डमिवातपत्रम्।।

अथवा

साक्षात् प्रियामुपगतामपहाय पूर्व,
चित्रार्पितां पुनरिमां बहुमन्यमान्।

http://questionpaperesult.com/

Scanned by CamScanner

स्रोतोवहां पथि निकामजलामतीत्य,
जातः सखे प्रणयवान्मृगतृष्णिकायाम् ।।

3. अभिज्ञानशाकुन्तलमधिकृत्य केषाञ्चित् पञ्च प्रश्नानां संस्कृतभाषया उत्तरं देयम्–
(क) कालिदासस्य कति रचनानि? नामानि लिखन्तु।
(ख) कण्वः सोमतीर्थं किमर्थं गतवान्।(ग) प्रभातरलं ज्योतिः कुतः न उदेति?
(घ) कः पापशङ्की?
(ङ) शकुन्तलादुष्यन्तयोः पुनर्मिलनं कुत्र अभवत्?
(च) दुष्यन्तस्य पुत्रस्य किं नाम आसीत्?
(छ) पञ्चमे अङ्के का शकुन्तलाम् उत्क्षिप्य अन्तर्हिता?
(ज) कः गुर्वरपि विरहदुःखं साहयति? (झ) शकुन्तलायाः अङ्गुलीयकं कुत्र पतितम्?
(ञ) दुष्यन्तस्य कुलस्य के द्वे प्रतिष्ठे?

4. अधोलिखितानां छन्दसां केषाञ्चित् याणां लक्षणमुदाहरण लक्षणसङ्गतिं च विवेचनीयम्–
(क) इन्द्रवज्राः। (ख) पुष्पिताग्रा। (ग) मन्दाक्रान्ता।
(घ) वंशस्थ। (ङ) शिखरिणी। (च) शार्दूलविक्रीडितम्

5. रामायणस्य रचनाकालविषये वर्णयम् रामायणस्य महत्त्वं प्रतिपादयतु।

अथवा

नाट्यपरम्परायाः उद्भवविकासविषये एकं निबन्धं लिखन्तु।

6. अधोलिखितेषु कयोः द्वयोः टिप्पणी लिखन्तु–
(क) कादम्बरी। (ख) शिशुपालवधम्। (ग) हितोपदेशः। (घ) गीतगोविन्दम्।

7. केषाञ्चित् पञ्च प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखन्तु–
(क) महाभारते कति पर्वाणि सन्ति? (ख) कतमं नाटकं कालिदासस्य सर्वस्वमस्ति?
(ग) कालिदासस्य के द्वे महाकाव्ये स्तः?
(घ) 'बुद्धचरितम्' इति महाकाव्यस्य कः रचयिता?
(ङ) 'कारुण्यं भवभूतिरेव तनुते' इयं सूक्ति कि नाकमाश्रित्य उक्ता?
(च) 'नीतिशतकम्' कस्य रचना अस्ति?(छ) प्रत्यक्षरश्लेषरचना का अस्ति?
(ज) 'बाणोच्छिष्टं जगत्सर्वम्: सूक्तिः कस्यै रचनायै प्रसिद्ध?
(झ) बृहत्कथायाः लेखकः कः अस्ति?

8. केषाञ्चित् पञ्च पदानां प्रकृतिप्रत्ययौ लेखनीयौ–
(क) अवलोक्य। (ख) दयमानाः। (ग) प्रवृत्तम्। (घ) रमणीयः।
(ङ) कृत्वा। (च) प्रहर्तुम्। (छ) विचिन्तयन्ती। (ज) सृष्टिः।
(झ) भोक्ता। (ञ) प्रणस्य।

http://questionpaperesult.com/

Scanned by CamScanner